PT4/ANNUAL EXAMINATION, 2024-25

SANSKRIT

Time – 3 hrs. **Class – IX** **M.M. – 80**

Date - 14.02.2025 (Friday)

Name of the student _____ *Section* _____

निर्देशाः -

- अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति ।
  - ✓ खण्डः क - अपठितावबोधनम् - 10 अंकाः
  - ✓ खण्डः ख - रचनात्मक कार्यम् - 15 अंकाः
  - ✓ खण्डः ग - अनुप्रयुक्त व्याकरणम् -25 अंकाः
  - ✓ खण्डः घ - पठितावबोधनम् - 30 अंकाः
- प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।
- प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया ।
- सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि ।
- बहुविकल्पीय प्रश्नानाम् उत्तराणि सम्यक् विकल्पसहितं सम्पूर्णतया लिखन्तु ।

खण्डः - क (अपठितांश-अवबोधनम् - 10 अंकाः)

प्र.1 अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -

एकदा सर्वे पक्षिणः मिलित्वा उलूकं स्वाधिपतिं विधातुं विचारितवन्तः। तस्य अभिषेकवेलापि तैः निश्चिता। ततो यदा अभिषेकोत्सवः प्रारब्धः तदैव कश्चित् वायसः तत्रागच्छत् । उलूकस्याभिषेक-समाचारं श्रुत्वा सोऽवदत् -"भोः! किं विचार्य भवद्भिः एषः दिवान्धः उलूकः राजपदे प्रतिष्ठापयितुं निश्चितः ? यस्य देशस्य राजा एवम् अन्धो भविष्यति तस्य प्रजा अपि तथैव भविष्यति । किं न श्रुतं भवद्भिः - "यथा राजा तथा प्रजा इति ।" ततः सर्वेऽपि तस्य परामर्शं मत्वा यत्र तत्र प्रस्थिताः ।

कथैषा पुरातनी परम् अस्याः तात्पर्यं तु अद्यापि अक्षरशः सत्यम्। लोकतान्त्रिकदेशेषु यथा राष्ट्रप्रमुखः सर्वकारो वा तथा तस्य देशस्य स्थितिः भवति। अतः राजपदे योग्यजनः एव प्रतिष्ठापयितव्यः । सम्प्रति यथा नेतारः तथा जनाः।

अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) **(1x2=2)**

(i) पक्षिणः कं स्वाधिपतिं विधातुम् उद्यताः?

(ii) यदा अभिषेकोत्सवः प्रारब्धः तदा कः तत्रागच्छत्?

(iii) राजपदे कीदृशः जनः प्रतिष्ठापयितव्यः?

आ. पूर्णवाक्येन लिखत - (केवलं प्रश्नद्वयम्) **(2x2=4)**

(i) वायसः तत्र कदा आगच्छत्?

(ii) वायसः उलूकस्य राजपदे प्रतिष्ठापनविषये किम् अवदत्?

(iii) लोकतान्त्रिकदेशेषु देशस्य कीदृशी स्थितिः भवतिः?

इ. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत । **(1)**

ई. यथानिर्देशम् उत्तरत - (केवलं प्रश्नत्रयम्) **(1x3=3)**

(i) "काकः" इत्यस्य किं समानार्थकपदं गद्यांशे प्रयुक्तम्?

(ii) "आगच्छत्" इति क्रियायाः कर्तृपदं गद्यांशात् चित्वा लिखत ।

(iii) "नवीना" इत्यस्य विलोमपदं गद्यांशात् चित्वा लिखत ।

(iv) "दिवान्धः उलूकः" इत्यनयोः पदयोः विशेषणपदं किम्?

खण्डः - ख (रचनात्मककार्यम् - 15 अंकाः)

प्र.2 भवान् रायगढ़नगरस्थ उमेशः । भवतः मित्रं राजीवः नागपुर-नगरे वसति । तं प्रति परीक्षायाम् सफलतायै वर्धापनपत्रं पूरयित्वा लिखत **(5)**

मञ्जूषा - अपश्यम्, महती, उमेशः, आगतः, तुभ्यम्, छात्रवृत्तिम्, अधिकतरा, राजीव, तत्रास्तु , रायगढ़नगरतः।

(i) .....

तिथिः **14.02.2025**

प्रिय मित्र **(ii).....**

अत्र कुशलम् **(iii).....** । अद्यैव तव परिणामः **(iv).....** । तव सफलतां ज्ञात्वा मम मनसि **(v).....** प्रसन्नता जाता । मम एषा प्रसन्नता **(vi).....** जाता यदा अहम् तव नाम योग्यता-सूचौ **(vii).....** । त्वया सप्त-शतानि अंकाः प्राप्ताः । त्वं निश्चित-रूपेण **(viii).....** प्राप्स्यसि । त्वया परिवारस्य विद्यालयस्य च नाम उज्ज्वलीकृतम् ।

अस्याम् उज्ज्वलसफलतायाम् अहम् **(ix).....** हार्दिकं वर्धापनम् यच्छामि उज्ज्वल-भविष्याय च कामये । मातृपितृचरणेषु प्रणामः ।

तव अभिन्नहृदयं मित्रम्

(x).....

प्र.3. अधोलिखितं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तपदानां सहायतया पञ्च वाक्यानि लिख्यन्ताम् - (1×5=5)

मञ्जूषा

वृक्षेषु, मण्डूकः, तिस्रः, जलगर्तस्य, नृत्यति, इन्द्रधनुषः, दोलाभिः, टर्र-टर्र इति शब्दम्, श्रावणमासस्य, वर्षायाः, अनुभवन्ति, कुर्वन्ति

अथवा

मञ्जूषाप्रदत्तशब्दानां सहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत - (1×5=5)

"कोरोना वायरसः"

मञ्जूषा - रोगस्य, चीनदेशस्य, विश्वस्वास्थ्यसंगठनं, महामारी, निर्देशानां, पालनीयम्, बुहाननगरे, मुखपट्टिका, हस्तप्रक्षालनम्, सावधानतया, चिकित्साविभागस्य।

प्र.4. अधोलिखितं संवादं मञ्जूषायां प्रदत्तपदानां सहायतया पूरयत- 1x5=5

सत्सङ्गतेः (i) .....को न जानसि ? संसारे द्विधा जनाः सन्ति, सज्जनाः दुर्जनाश्च । दुर्जनस्य संगतिम् कोऽपि कर्तुम् न इच्छति। अपरत्र सत्सगं विना जीवनम् एव (ii).....भवति। वस्तुतः (iii).....जनानां पोषिका कुसंगतिश्च नाशिका। अतः सत्संगतिः एव श्रेयसी। (iv) .....तु स्वगुणैः एव सन्तः कथयन्ते, अतएव जनाः सज्जनानां सङ्गतिम् इच्छन्ति । सद्गुणेनैव जनः (v).....वाचा कर्मणा स्वस्थो भवति।

मञ्जूषा - मनसा, सज्जनाः, सत्सङ्गतिः, दुर्जीवनं, महिमानम् ।

अथवा

रिक्तस्थानानि पूरयित्वा अधोलिखितसंवादं पुनः लिखत। (5×1=5)

रेखा - अरे कृष्णः ! त्वं किं करोषि ?

कृष्णः - अहम् (i) .....

रेखा- इदं त्वया उचितम् न कृतम्। अवकरम् यत्र-तत्र न क्षिपेत् केवलं पात्रे हि क्षिपेत्।

कृष्णः- कथम् अत्र तव गृहम् अस्ति किम् ?

रेखा- नहि, मम गृहं नास्ति, परन्तु (ii).....

कृष्णः- गच्छ, स्वकार्यम् कुरु। अलं विवादेन।

रेखा- प्रथमम् अवकरं (iii).....

कृष्णः- इदम् अहं न करिष्यामि।

रेखा- मित्र ! अत्र वयं भ्रमामः क्रीडामः च। अवकरेण विविधाः रोगाः (iv) ..... | मार्गाणाम् स्वच्छता तु सर्वेषाम् स्वास्थाय आवश्यकम् अस्ति। वयम् छात्राः स्मः। वयम् एव स्वच्छतायाः संदेशम् दातुम् शक्नुमः ।

कृष्णः - सत्यं कथयसि। शीघ्रम् स्वच्छम् करोमि । इदम् तु (v)..... ।

मञ्जूषा - उत्पन्नाः भवन्ति, अवकरं क्षिपामि, पात्रे क्षिपतु, पर्यावरणाय अपि आवश्यकम्, स्वच्छता तु सर्वेषाम् कृते आवश्यकी भवति।

खण्डः - ग (अनुप्रयुक्त-व्याकरणम् 25 अंकाः)

प्र.5. रेखाङ्कितपदानां सन्धिं विच्छेदं वा कृत्वा लिखत- ***(केवलं प्रश्नपञ्चकम्)*** 1x5=5

(i) मुने! न भर्तृसेवायाः अपर कञ्चन् धर्मं करोम्यहम् ।

(ii) यः सर्वमर्पयति चान्यसुखस्य हेतो ।

(iii) अष्टावक्रः राजसभां गतः ।

(iv) लक्ष्मीधरनामा कः + चिद् विद्वान् द्वारदेशम् अध्यासते ।

(v) सततम् एधतां विद्यासु कलासु च भवत् + अनुरागः ।

(vi) तव पिता राजा + ऋषेः जनकस्य सभां गतः आसीत् ।

प्र.6. उचितविभक्तिपदं विकल्पेभ्यः चित्वा वाक्यानि पूरयत - *(केवलं प्रश्नचतुष्टयम्)* 1x4=4

(i) कृष्णः .....अलम् । (कंस)

(क) कंसम् (ख) कंसेन (ग) कंसाय (घ) कंसस्य

(ii) अहम्..... विना न गमिष्यामि । (युष्मद्)

(क) त्वयि (ख) त्वम् (ग) त्वां (घ) तव

(iii) शीलायाः.....पुरतः मन्दिरम् अस्ति ? (गृह)

(क) गृहम् (ख) गृहस्य (ग) गृहात् (घ) गृहेण

(iv) शिक्षकः..... स्निह्यति। (छात्र)

(क) छात्रान् (ख) छात्राः (ग) छात्रेषु (घ) छात्रैः

(v) जनकः ..... कुप्यति ।

(क) पुत्रम् (ख) पुत्रस्य (ग) पुत्रे (घ) पुत्राय

प्र.7. प्रदत्तविकल्पेभ्यः उचितं शब्दरूपं चित्वा वाक्यानि पूरयत - (केवलं प्रश्नचतुष्टयम्) 1x4=4

(i) विद्या .....अपि गुरुः भवति । (गुरु)

(क) गुरुः (ख) गुरुवे (ग) गुरुणाम् (घ) गुरुषु

(ii) .....शोभते नरः। (नम्रता)

(क) नम्रतया (ख) नम्रतायाः (ग) नम्रताम् (घ) नम्रतासु

(iii) ..... तटेषु एव महाकुम्भमेलापकः भवति ।

क) नद्या ख) नदीनाम् ग) नदीभ्यः घ) नदीभिः

(iv) गृहणी ..... भोजनं यच्छति ।

क) साधवे ख) साधुम् ग) साधुना घ) साधूनाम्

(v) एतत् ..... पुस्तकम् अस्ति ।

क) अस्माकं ख) मया ग) त्वया घ) मत्

प्र.8. प्रदत्तविकल्पेभ्यः उचितं धातुरूपं चित्वा वाक्यानि पूरयत - (*केवलं प्रश्नचतुष्टयम्*) 1x4=4

(i) फलयुक्ताः वृक्षाः एव .....| (नम्-लट्लकारे)

क) अनमत् ख) नमन्ति ग) नमसि घ) नमति

(ii) सच्चरित्राः जनाः सदैव सम्मानं ..... | (लभ्-लृट्लकारे)

क) लभते ख) लप्स्यन्ते ग) लभन्ते घ) लप्स्यसे

(iii) ह्यः अहम् विद्यालयं न .....| (गम्- लङ्लकारे)

क) अगच्छम् ख) आगच्छति ग) गमिष्यति घ) गच्छन्तु

(iv) यूयं मात्रे फलानि गृहम् ..... | (नी - लोट्लकारे)

क) नयावः ख) नयाम ग) नयन्ति घ) नयत

(v) सर्वे जनाः सुखिनः ..... | (अस् - विधिलिङ्लकारे)

क) स्यात् ख) स्युः ग) भवन्तु घ) सन्तु

प्र.9. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययविभागं संयोजनं वा विकल्पेभ्यः चिनुत- (*केवलं प्रश्नचतुष्टयम्*) 1x4=4

(i) मुनिः ब्राह्मणगृहम् <u>प्राप्य</u> तद्गृहिणीं भिक्षाम् अयाचत।

क) प्र+आप्+य ख) प्र+आप्+क्त्वा ग) प्र+आप्+ल्यप् घ) प्र+आप्+तुमुन्

(ii) एवम्भूतं पुत्रम् <u>दृष्ट्वा</u> पिता उवाच ।

क) दृश् + क्त्वा ख) दृश् + त्वा ग) दृश् + ल्यप् घ) दृश् + तुमुन

(iii) अष्टावक्रः राजसभां गन्तुम् इच्छति ।

क) गन् + तुमुन् ख) गम् + तुमुन् ग) गम् + क्त्वा घ) गम् + ल्यप्

(iv) राज्ञः भोजस्य यशोगानं कृ + शतृ लक्ष्मीधरः अवदत् ।

क) कुर्वन् ख) कुर्वत् ग) कृतः घ) कृत्वा

(v) समस्तं नगरं भ्रम् + क्त्वा कमपि निरक्षरं मूर्खं वा जनं न अपश्यम् ।

क) भ्रान्त्वा ख) भ्रान्तः ग) भ्रम्य घ) संभ्रान्त्वा

प्र.10. मञ्जूषातः उचितम् अव्ययपदं चित्वा रिक्तस्थानानि पूरयत- (केवलं प्रश्नचतुष्टयम्) 1x4=4

(i) आसीत् ..... कोऽपि महातपानाम वनवासी मुनिः ।

(ii) श्वः प्रभाते ..... अहम् राजसभां गत्वा ज्ञास्यामि का वार्ता ?

(iii) सर्वसाक्षी निर्लेपः नित्यः निराकारश्च आत्मा ..... न दृश्यते ?

(iv) ..... त्वया मया सह राजसभां गन्तव्यम् ।

(v) यत्नात् करोमि ..... चारुतरं करोमि ।

मञ्जूषा - मञ्जूषा- कथम्, एव , तर्हि, पुरा, यदि,

खण्डः - घ (पठित-अवबोधनम् - 30 अंकाः)

प्र.11. अधोलिखितं गद्यांशम् पठित्वा तदाधारितान् प्रश्नान् उत्तरत- (5)

ततश्च सा साध्वी भर्तुः शुश्रूषां कृत्वा भिक्षामादाय मुनेः अन्तिकम् आगता। स च मुनिः बद्धाञ्जलिः तामवदत् "कथं त्वया अनन्यगोचरो बलाकावृत्तान्तो ज्ञातः इति ब्रूहि, ततो भिक्षां ग्रहीष्ये। साऽवदत् "मुने! न भर्तृसेवायाः अपरं कञ्चन धर्मं करोम्यहम्। तत्प्रसादेन एव मे एतादृशं विज्ञानम्। किञ्च इतः धर्मव्याधाख्यं कञ्चन मांस-विक्रयिणं गत्वा एतत् पृच्छ। ततस्ते श्रेयो भविष्यति त्वं च निरहङ्कारः भविष्यसि इति।" एवं सर्वविदा पतिव्रतया अभिहितः गृहीतातिथिसत्कारः स मुनिः तां प्रणम्य तद्गृहाद् निरगच्छत्।

I. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) (½x2=1)

a) साध्वी किम् आदाय मुनेः अन्तिकम् आगता ?

b) मांसविक्रयिणः किं नाम आसीत् ?

c) मुनिः कां प्रणमति ?

II. पूर्णवाक्येन उत्तरत-(प्रश्नद्वयम् केवलं) (1x2=2)

a) कः निरहङ्कारः भविष्यति ?

b) कीदृशः मुनिः तां प्रणम्य निरगच्छत् ?

c) साध्वी धर्मव्याधं किम् अवदत् ?

III. भाषिककार्यम्- (केवलं प्रश्नद्वयम्) (1x2=2)

(i) अनुच्छेदे 'समीपम्' इत्यस्य पदस्य कृते किं पदम् आगतम् ?

(ii) 'तत्प्रसादेन एवं मे' अत्र 'मे' पदं कस्मै प्रयुक्तम् ?

(iii) 'भविष्यति' क्रियापदस्य कर्तृपदं किम्?

प्र.12. अधोलिखितम् पद्यांशम् पठित्वा तदाधारितान् प्रश्नान् उत्तरत- (5)

छायामन्यस्य कुर्वन्ति तिष्ठन्ति स्वयमातपे।

फलान्यपि परार्थाय वृक्षाः सत्पुरुषा इव।।

अहो! एषां वरं जन्म सर्वप्राण्युपजीवनम्।

धन्या महीरुहा येभ्यो निराशा यान्ति नार्थिनः ।।

I. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) **(½x2=1)**

a) वृक्षाः छायां कस्य कुर्वन्ति ?

b) वृक्षाः स्वयं कुत्र तिष्ठन्ति ?

c) केषां जन्म वरम् ?

II. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्) **(1x2=2)**

a) के धन्याः?

b) वृक्षाः परार्थाय किं किं कुर्वन्ति?

c) अर्थिनः केभ्यः निराशाः न यान्ति ?

III. निर्देशानुसारं उत्तरत । (केवलं प्रश्नद्वयम्) **(1x2=2)**

a) तरवः, इति पदस्य किम् पर्यायपदम् श्लोके प्रयुक्तम् ।

b) श्लोके 'कुर्वन्ति' क्रियापदस्य कर्तृपदं किम् ?

c) 'छायायां' पदस्य श्लोके विपर्ययः कः?

प्र.13 अधोलिखितनाट्यांशं पठित्वा तदाधारितान् प्रश्नान् उत्तरत- **(5)**

द्वारपालः - जयतु देवः। द्रविडदेशीयः लक्ष्मीधरनामा कश्चिद् विद्वान् देवस्य दर्शनार्थं द्वारदेशम् अध्यास्ते।

भोजः - सादरं प्रवेशय।

द्वारपालः - यथा आदिशति देवः ! (निष्क्रान्तः)

लक्ष्मीधरः - (द्वारपालेन सह प्रविश्य), राजन् ! अभिवादये भवन्तम्। दिनकरदीप्तिरिव भवत्कीर्तिः दिक्षु प्रसारम् आप्नोतु। वर्धन्तां विभवाः सौख्यानि च। लसन्तु सम्पदः, विलयं व्रजन्तु च विपदः । प्रतिष्ठां लभां विद्वदगणः। सतलम् एधतां विद्यासु कलासु च भवदनुरागः।

I. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) **(½x2=1)**

a) द्रविडदेशीयः आगंतुकः कः आसीत्?

b) लक्ष्मीधरः किमर्थम् अध्यास्ते?

c) लक्ष्मीधरः कुत्र अतिष्ठत्?

II. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्) **(1x2=2)**

a) प्रविश्य लक्ष्मीधरः कम् अवदत् ?

b) कस्य कीर्तिः दिक्षु प्रसारम् आप्नोतु ?

c) राज्ञः अनुरागः कस्याम् आसीत्?

III. निर्देशानुसारम् उत्तरत - (केवलं प्रश्नद्वयम्) **(1x2=2)**

a) 'दिक्षु' इत्यस्मिन् पदे का विभक्तिः?

b) 'सह' योगे अत्र का विभक्तिः प्रयुक्ता ?

c) 'लसन्तु' इत्यस्मिन् पदे कः लकारः अस्ति?

प्र.14. अधोलिखितवाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत - (*केवलं प्रश्नचतुष्टयम्*) **(1x4=4)**

क) राजन्! मया श्रुतम् आसीत्।

ख) सा गृहिणी विहस्य अभाषत्।

ग) आरुणिः श्वेतकेतोः पिता आसीत्।

घ) साध्वी भर्तुः परिचर्या समापये।

ङ) पुरा महातपा नाम मुनिः आसीत्।

प्र.15. अधोलिखितस्य श्लोकस्य अन्वयम् उचितपदैः पूरयत- **(1x4=4)**

अहो! एषां वरं जन्म सर्वप्राण्युपजीवनम् ।
धन्या महीरुहा येभ्यो निराशा यान्ति नार्थिनः ॥

अन्वयः - अहो ! (i)..... उपजीवनम् एषां जन्म (ii)..... । महीरुहाः (iii)..... (सन्ति) (iv) ..... अर्थिनः निराशाः न यान्ति ।

मञ्जूषा - धन्याः, येभ्यः, सर्वप्राणी, वरम्

प्र.16. अधोलिखितकथायाः पूर्तिः मञ्जूषायाः उचितैः पदैः कुरुत- **(½x8=4)**

महाराज ! तन्तुवयनं मम (i)..... । अहं रात्रिन्दिवम् परिश्रम्य (ii)..... व्यवसायेन (iii) .....। काव्यरचनायां महाकवितुल्यः मम (iv)..... न अस्ति तथापि किञ्चित् (v) .....। श्रोतुमर्हन्तु भवन्तः। साधु ! कीदृशी लालित्यपूर्णा (vi)..... 'कवयामि वयामि यामि' धन्योऽसि त्वम्। (vii)..... आत्मानं धन्यं मन्ये, यस्य राज्ये (viii).....कुम्भकाराः, अयस्काराः शिल्पिनः श्रमिकाः अपि ललितां काव्यरचनां कुर्वन्ति ।

मञ्जूषा - पदयोजना, अनेन, निवेदयामि, अहमपि, व्यवसायः, अभ्यासः, तन्तुवायाः, जीविकामर्जयामि।

प्र.17. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुसारम् उचितम् अर्थं विकल्पेभ्यः चिनुत-
(*केवलं प्रश्नत्रयम्*) **(1x3=3)**

I. ततस्ते श्रेयः भविष्यति।
(क) क्रेयः (ख) कल्याणम् (ग) आत्मानम् (घ) कार्यम्

II. गुरुं प्रति गच्छ अध्ययनार्थम्।
(क) गमनार्थम् (ख) अधिगमनार्थम् (ग) पठनार्थम् (घ) सेवार्थम्

III. यत्र जलं पूर्णं सरः भवति तत्र पक्षिणः स्वयं समायान्ति।
(क) खगाः (ख) पक्षाः (ग) जनाः (घ) हरिणाः

IV. अनुकूलः शुचिर्दक्षः कविः विद्वान् सुदुर्लभः ।
(क) निपुणः (ख) दक्षराजः (ग) व्यस्तः (घ) व्यग्रता